# UNIVERSITY OF CALICUT
## SCHOOL OF DISTANCE EDUCATION

**B.A. MALAYALAM (2011 Admission)**
**I SEMESTER**

**COMPLEMENTARY COURSE**

***PROSE, POETRY, APPLIED GRAMMAR AND TRANSLATION***

# QUESTION BANK

**कोष्ठात् समुचितमुत्तरमादाय लिखत**

**(ബ്രാക്കറ്റിൽനിന്നും ശരിയായ ഉത്തരം തെരഞ്ഞെടുത്തെഴുതുക)**

1. बालरामायणं केन विरचितम्?
   (वाल्मीकिना, रामानुजेन, अनन्तनारायणशास्त्रिणा)
   Ans: अनन्तनारायणशास्त्रिणा।
2. कोसलेषु मनुना स्वयं निर्मिता नगरी का?
   (मिथिला, अयोध्या, लङ्का)
   Ans: अयोध्या।
3. अयोध्यानगर्याः राजा कः?
   (रावणः, लक्ष्मणः, दशरथः)
   Ans: दशरथः।
4. कौसल्या कैकेयी सुमित्रेति तिस्रः भार्याः अभवन्। कस्य?
   (रामस्य, लक्ष्मणस्य, दशरथस्य)
   Ans: दशरथस्य।
5. दशरथस्य पुरोहितः कः?
   (वसिष्ठः, विश्वामित्रः, पराशरः)
   Ans: वसिष्ठः।
6. नृपतिः दशरथः पायसार्धं प्रथमं कस्यै ददौ?
   (सुमित्रायै, कौसल्यायै, कैकेय्यै)
   Ans: कौसल्यायै।

7. कस्मिन् नक्षत्रे रामः अजायत?

 (हस्ते, ज्येष्ठायां, पुनर्वसौ)

 Ans: पुनर्वसौ।

8. रामस्य जन्मसमये कति ग्रहाः उच्चस्थाने आसन्?

 (त्रयः, चत्वारः, पञ्च)

 Ans: पञ्च।

9. कैकेय्याः पुत्रः कः?

 (रामः, शत्रुघ्नः, भरतः)

 Ans: भरतः।

10. लक्ष्मणशत्रुघ्नौ कस्याः पुत्रौ भवतः?

 (सुमित्रायाः, कैकेय्याः, कौसल्यायाः)

 Ans: सुमित्रायाः।

11. रामस्य माता का?

 (सुमित्रा, कैकेयी, कौसल्या)

 Ans: कौसल्या।

12. 'प्रजाकरमिदं देवनिर्मितं पायसं गृहाण'। प्राजापत्यः पुरुषः कमेवमुवाच?

 (दशरथं, वसिष्ठं, रामं)

 Ans: दशरथम्।

13. लक्ष्मणस्य कस्मिन् असाधारणी प्रीतिः अभवत्?

 (रामे, भरते, शत्रुघ्ने)

 Ans: रामे।

14. भरते कस्य असाधारणी प्रीतिः अभवत्?

 (रामस्य, शत्रुघ्नस्य, लक्ष्मणस्य)

 Ans: शत्रुघ्नस्य।

15. पुत्राणां दारक्रियां प्रति चिन्तयति दशरथे कः अयोध्यां प्रपेदे?

 (वसिष्ठः, विश्वामित्रः, विभीषणः)

 Ans: विश्वामित्रः।

16. 'अपुत्रस्येव पुत्रजन्म तवेदमागमनं मन्ये'-राजा कमेवमुवाच?

 (वसिष्ठं, विश्वामित्रं, रामं)

 Ans: विश्वामित्रम्।

17. विश्वामित्रस्य विघ्नकरौ राक्षसौ कौ?

(सुबाहुमारीचौ, शुम्भनिशुम्भौ, रावणकुम्भकर्णौ)

Ans: सुबाहुमारीचौ।

18. ज्येष्ठं पुत्रं रामं मे दातुमर्हसि। कस्मै?

(दशरथाय, विश्वामित्राय, वसिष्ठाय)

Ans: विश्वामित्राय।

19. विश्वामित्रस्य भाषितं श्रुत्वा कः मुहूर्तं निःसंज्ञो बभूव?

(रामः, दशरथः, ताटका)

Ans: दशरथः।

20. पुत्रविश्लेषकातरस्य दशरथस्य वचनं निशम्य कः कुपितः बभाषे?

(वसिष्ठः, विश्वामित्रः, लक्ष्मणः)

Ans: विश्वामित्रः।

21. 'मिथ्याप्रतिज्ञस्त्वं चिराय सुखी भव'-विश्वामित्रः कमेवमुवाच?

(दशरथं, रामं, वसिष्ठं)

Ans: दशरथम्।

22. इक्ष्वाकुवंशे जातः कः?

(दशरथः, ताटका, मारीचः)

Ans: दशरथः।

23. कस्मिन् कुपिते कृत्स्ना वसुधा भयेन चचाल?

(दशरथे, कौशिके, रामे)

Ans: कौशिके।

24. 'विश्वामित्रेण गुप्तस्य रामभद्रस्य कुतो भेतव्यम्'-वसिष्ठः कमेवमाबभाषे?

(दशरथं, रामं, कौशिकं)

Ans: दशरथम्।

25. दशरथः सलक्ष्मणं रामं कस्मै प्रदाय गमनायानुमेने?

(कौशिकाय, वसिष्ठाय, कौसल्यायै)

Ans: कौशिकाय।

26. राघवाभ्यां सहितः कौशिकः कां तीर्त्वा दक्षिणं तीरमाससाद?

(सरयूं, पूर्णां, तमसां)

Ans: सरयूम्।

27. ‘मत्तो बलामतिबलां च विद्ये सानुजो गृहाण’-विश्वामित्रः कमेवमादिदेश?

    (रामं, लक्ष्मणं, दशरथं)

    Ans: रामम्।

28. ‘किं न्विदं दारुणं वनम्’-कस्येदं वचनम्?

    (रामस्य, कौशिकस्य, लक्ष्मणस्य)

    Ans: रामस्य।

29. सुन्दस्य भार्या का?

    (ताटका, मन्दोदरी, ऊर्मिला)

    Ans: ताटका।

30. मारीचस्य रक्षसः जननी का?

    (ताटका, सीता, ऊर्मिला)

    Ans: ताटका।

31. नागसहस्रबला का?

    (सीता, ताटका, माण्डवी)

    Ans: ताटका।

32. दाशरथिः कः?

    (रामः, रावणः, विश्वामित्रः)

    Ans: रामः।

33. शिलाजालं वर्षन्ती का राममभ्यद्रवत्?

    (ताटका, सुरसा, सिंहिका)

    Ans: ताटका।

34. अभिमुखमापतन्तीं ताटकां रामः केन उरसि विव्याध?

    (शरेण, गदया, पुष्पेण)

    Ans: शरेण।

35. ताटकावधेन तोषितः कः?

    (विश्वामित्रः, रामः, दशरथः)

    Ans: विश्वामित्रः।

36. राघवौ मुनिमनुगच्छन्तौ कम् अवापताम्?

    (आश्रमपदं, जनपदं, अन्तःपुरं)

    Ans: आश्रमपदम्।

37. तौ कदापि न मार्गखेदम् अवबुध्येताम्। कौ?

(राघवौ, रावणकुम्भकर्णौ, वसिष्ठविश्वामित्रौ)

Ans: राघवौ।

38. नियतेन्द्रियो मुनिवरो कां प्रविवेश?

(आश्रमं, दीक्षां, व्रतचर्यां)

Ans: दीक्षाम्।

39. रामः कम् आग्नेयास्त्रेण गतासुं कृतवान्?

(सुबाहुं, रावणं, मारीचं)

Ans: सुबाहुम्।

40. का गौतमशापेन अदृश्यतां गता?

(सीता, अहल्या, मन्दोदरी)

Ans: अहल्या।

41. गौतमस्य धर्मपत्नी का?

(अहल्या, अरुन्धती, श्रुतकीर्तिः)

Ans: अहल्या।

42. अहल्यासहितेन गौतमेन विधिवत्कृतां सपर्यां कः प्रतिजग्राह?

(रामः, वसिष्ठः, दशरथः)

Ans: रामः।

43. जनकस्य पुरोहितः कः?

(वसिष्ठः, शतानन्दः, दशरथः)

Ans: शतानन्दः।

44. 'रामः यद्यस्य धनुषः आरोपणं कुर्यात्तर्हि सीतामवश्यं तस्मै दद्याम्'- जनकः कमेवमुवाच?

(दशरथं, विश्वामित्रं, लक्ष्मणं)

Ans: विश्वामित्रम्।

45. विश्वामित्रेण 'धनुर्दर्शय रामाय' इति कः प्रार्थितः?

(जनकः, वसिष्ठः, दशरथः)

Ans: जनकः।

46. सन्तोषवार्तानिवेदनार्थं जनकेन के अयोध्यां प्रेषिताः?

(दूताः, मन्त्रिणः, गुप्तचराः)

Ans: दूताः।

47. दशरथः कीदृश्या सेनया मिथिलां प्रतस्थे?

(चतुरङ्गया, एकाङ्गया, त्र्यङ्गया)

Ans: चतुरङ्गया।

48. समागतं दशरथं कया सम्भाव्य जनकः परमं प्रहर्षं प्रपेदे?

(सपर्यया, वाद्येन, गीतेन)

Ans: सपर्यया।

49. ऊर्मिलां लक्ष्मणाय प्रदास्यामीति कः प्रतिजज्ञे?

(दशरथः, विश्वामित्रः, जनकः)

Ans: जनकः।

50. जनकस्य भ्राता कः?

(कुशध्वजः, वसिष्ठः, ऋष्यशृङ्गः)

Ans: कुशध्वजः।

51. माण्डवीश्रुतकीर्ती कस्य सुते भवतः?

(जनकस्य, वसिष्ठस्य, कुशध्वजस्य)

Ans: कुशध्वजस्य।

52. शत्रुघ्नस्य अनुरूपा वधू का?

(श्रुतकीर्तिः, माण्डवी, ऊर्मिला)

Ans: श्रुतकीर्तिः।

53. माण्डवी कस्य धर्मपत्नी?

(भरतस्य, शत्रुघ्नस्य, लक्ष्मणस्य)

Ans: भरतस्य।

54. परमशिवस्य धनुः केन भग्नम्?

(श्रीरामेण, परशुरामेण, दशरथेन)

Ans: श्रीरामेण।

55. कः त्रिःसप्तकृत्वः मेदिनीं निक्षत्रियाम् अकरोत्?

(परशुरामः, श्रीरामः, बलरामः)

Ans: परशुरामः।

56. कस्य दर्शनमात्रेण दशरथस्य हृदयं चकम्पे?

(जामदग्न्यस्य, विश्वामित्रस्य, रावणस्य)

Ans: जामदग्न्यस्य।

57. 'मया समानीतेऽस्मिन् धनुषि ते विक्रमः प्रकाशताम्'-कः राघवमेवमवदत्?

(जामदग्न्यः, श्रीरामः, बलरामः)

Ans: जामदग्न्यः।

58. वैष्णवं धनूरत्नं गृहीत्वा कः अमोघं शरं सन्दधे?

(श्रीरामः, परशुरामः, बलरामः)

Ans: श्रीरामः।

59. भग्नदर्पः जामदग्न्यः तपसे कं प्रययौ?

(महेन्द्रपर्वतं, अयोध्यां, लङ्कां)

Ans: महेन्द्रपर्वतम्।

60. श्रियेव श्रीपतिः सुतरां विरेजे। कः?

(श्रीरामः, लक्ष्मणः, दशरथः)

Ans: श्रीरामः।

61. रामायणे कति काण्डानि सन्ति?

(पञ्च, सप्त, नव)

Ans: सप्त।

62. आदिकविरिति वाल्मीकिः प्रथितः। आदिकाव्यं किम्?

(रामायणं, महाभारतं, किरातार्जुनीयम्)

Ans: रामायणम्।

63. रामायणमुपजीव्य भासेन रचितं नटकं किम्?

(अभिषेकनाटकं, स्वप्नवासवदत्तं, चारुदत्तं)

Ans: अभिषेकनाटकम्।

64. कोसलेषु मनुना स्वयं निर्मिता ---------- नाम नगरी आसीत्।

(मिथिला, लङ्का, अयोध्या)

Ans: अयोध्या।

65. महात्मनस्तस्य राजर्षेः ---------- तप्यमानस्यापि सुतो नाजायत।

(सुतार्थं, अभ्युदयार्थं, सिध्यर्थं)

Ans: सुतार्थम्।

66. राजा पुरोधसा वसिष्ठेन ---------- पुरस्कृत्य यज्ञकर्म कारयामास।

(ऋष्यशृङ्गं, विश्वामित्रं, मारीचं)

Ans: ऋष्यशृङ्गम्।

67. परमभास्वरः ---------- तत्रैव अन्तर्दधे।

(दिव्यपुरुषः, रामः, वसिष्ठः)

Ans: दिव्यपुरुषः।

68. महीपतेः उत्तमस्त्रियः पायसं तत्प्राश्य ---------- अधारयन्।

(गर्भान्, विद्यां, प्रभावं)

Ans: गर्भान्।

69. ---------- तिथौ कौसल्या राममजनयत्।

(नवम्यां, सप्तम्यां, एकादश्यां)

Ans: नवम्याम्।

70. कैकेय्यां सत्यपराक्रमो --------- जज्ञे।

(भरतः, शत्रुघ्नः, लक्ष्मणः)

Ans: भरतः।

71. ---------- वीरौ लक्ष्मणशत्रुघ्नौ जज्ञाते।

(कैकेय्यां, कौसल्यायां, सुमित्रायां)

Ans: सुमित्रायाम्।

72. ते राजपुत्राः ------- अतीत्य सर्वेषु शास्त्रेषु नैपुण्यं प्रत्यपद्यन्त।

(शैशवं, कौमारं, यौवनं)

Ans: शैशवम्।

73. राजा दशरथः --------- महाभागैः पुत्रैः परमप्रीतः बभूव।

(चतुर्भिः, पञ्चभिः, त्रिभिः)

Ans: चतुर्भिः।

74. कं वा भवतः -------- करवाणि।

(कामं, कर्म, प्रतिज्ञां)

Ans: कामम्।

75. ---------- नियममातिष्ठतः विश्वामित्रस्य सुबाहुमारीचौ विघ्नकरौ भवतः।

(सिध्यर्थं, पुत्रार्थं, विद्यार्थं)

Ans: सिध्यर्थम्।

76. -------- विश्वामित्रस्य भाषितं श्रुत्वा मुहूर्तं निःसंज्ञो बभूव।

(दशरथः, वसिष्ठः, विश्वामित्रः)

Ans: दशरथः।

77. कुपिते कौशिके कृत्स्ना वसुधा -------- चचाल।

(भयेन, मोदेन, स्वेन)

Ans: भयेन।

78. प्रतिष्ठमाने कौशिकानुयायिनि रामे महती ------- आसीत्।

(पुष्पवृष्टिः, शरवृष्टिः, सुवर्णवृष्टिः)

Ans: पुष्पवृष्टिः।

79. श्रूयतामस्य ----------- वनस्य वृत्तान्तः।

(दारुणस्य, भीकरस्य, भितिदस्य)

Ans: दारुणस्य।

80. सेयं --------- प्राणहारिणी इतोऽध्यर्धयोजने वसति।

(पथिकानां, पण्डितानां, दीनानां)

Ans: पथिकानाम्।

81. तामेनां निहत्य देशमिमं ----------- कर्तुमर्हसि।

(निष्कण्टकं, स्फीतं, निर्निशाचरं)

Ans: निष्कण्टकम्।

82. ---------- शृण्वन्तौ राजपुत्रौ कदापि मार्गखेदमबुध्येताम्।

(कथाः, गानं, संवादं)

Ans: कथाः।

83. राघवौ निर्निद्रौ तपोवनस्य रक्षणे -------- अवर्तेताम्।

(जागरूकौ, बद्धश्रद्धौ, अलसौ)

Ans: जागरूकौ।

84. सानुचरौ सुबाहुमारीचौ यज्ञशालामुपगम्य --------- अवर्षताम्।

(पुष्पं, रुधिरौघं, सुवर्णं)

Ans: रुधिरौघम्।

85. सर्वेऽपि तपोवनस्थाः नितान्तप्रमुदिताः -------- बहुधा प्रशशंसुः।

(राघवं, विश्वामित्रं, वसिष्ठं)

Ans: राघवम्।

86. -------- जनकस्य परमपावनो यज्ञः इदानीं प्रवर्तते।

(मिथिलापतेः, अयोध्यापतेः, लङ्कापतेः)

Ans: मिथिलापतेः।

87. तत्रत्यमप्रमेयप्रभावं शाम्भवं --------- द्रष्टुमर्हसि।

(धनूरत्नं, सुवर्णरत्नं, पर्वतं)

Ans: धनूरत्नम्।

88. निवेदयामास च तयोः ------- दर्शनकौतुकम्।

(पुष्पस्य, महाधनुषः, पर्वतस्य)

Ans: महाधनुषः।

89. इदं किल धनूरत्नं -------- राज्ञः हस्ते न्यासीकृतम्।

(देवरातस्य, दशरथस्य, शिवस्य)

Ans: देवरातस्य।

90. बहवो राजानः -------- अत्रागत्य वरयामासुः।

(सीतां, ऊर्मिलां, माण्डवीं)

Ans: सीताम्।

91. धनुषोऽस्य ग्रहणेऽप्यशक्ताः राजानः --------- निववृतिरे।

(भग्नाशाः, निराशाः, सफलाशाः)

Ans: भग्नाशाः।

92. निर्घातसमेन निस्वनेन सर्वापि जनता --------- प्रपेदे।

(मोहं, सुखं, मोदं)

Ans: मोहम्।

93. समागतं दशरथं सपर्यया संभाव्य ------- परमं प्रहर्षं प्रपेदे।

(जनकः, विश्वामित्रः, वसिष्ठः)

Ans: जनकः।

94. इक्ष्वाकुकुलदैवतं ------- कन्याः चतुर्भ्यः राजकुमारेभ्यः वरयामास।

(वसिष्ठः, विश्वामित्रः, दशरथः)

Ans: वसिष्ठः।

95. राघवो -------- तद्गृहीत्वा तस्मिन्नमोघं शरं सन्दधे।

(लीलया, मोदेन, जवेन)

Ans: लीलया।

96. गते जामदग्न्ये प्रमुदितः दशरथः ----------- सम्प्राप।

(स्वमन्दिरं, अयोध्यां, मिथिलां)

Ans: स्वमन्दिरम्।

97. राजमहिष्यः सर्वापि गुणगरीयसीः ------ प्रतिपद्य नितरां जहृषुः।

(स्नुषाः, सोदर्यः, पुत्र्यः)

Ans: स्नुषाः।

98. दशरथस्य --------- भार्याः आसन्।

(तिस्रः, चतस्रः, पञ्च)

Ans: तिस्रः।

99. 'मानिषाद प्रतिष्ठां त्वमगमः शाश्वती समाः'-अत्र मानिषादः कः?

(विष्णुः, निषादः, रावणः)

Ans: विष्णुः।

100. 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः'-अत्र निषादः कः?

(पुलिन्दः, रावणः, श्रीरामः)

Ans: पुलिन्दः।

101. रघुवंशमहाकाव्ये कति सर्गाः सन्ति?

(एकादश, त्रयोदशः, एकोनविंशतिः)

Ans: एकोनविंशतिः।

102. कालिदासस्य महाकाव्यं किम्?

(रघुवंशं, मेघसन्देशं, अभिज्ञानशाकुन्तलं)

Ans: रघुवंशम्।

103. 'वागर्थाविव संपृक्तौ' इति श्लोकेन आरब्धं महाकाव्यं किम्?

(कुमारसंभवं, रघुवंशं, मेघसन्देशं)

Ans: रघुवंशम्।

104. विश्वजिति अध्वरे कः सर्वस्वं ददौ?

(रघुमहाराजः, कौत्सः, वरतन्तुः)

Ans: रघुमहाराजः।

105. वरतन्तुशिष्यः कः?

(कौत्सः, रघुः, कैलासनाथः)

Ans: कौत्सः।

106. कौत्सस्य गुरुः कः?

(वरतन्तुः, रघुः, कैलासनाथः)

Ans: वरतन्तुः।

107. 'प्रत्युज्जगामातिथिमातिथेयः'-कः अतिथिं प्रत्युज्जगाम?

(रघुः, कौत्सः, वरतन्तुः)

Ans: रघुः।

108. मानधनाग्रयायी विधिज्ञः कः?

(कौत्सः, रघुः, वरतन्तुः)

Ans: रघुः।

109. अशेषं ज्ञानं कस्मात् आप्तम्?

(गुरोः, लोकात्, तपसः)

Ans: गुरोः।

110. तपः कीदृशम्?

(वासवधैर्यलोपि, महत्, अनुपमं)

Ans: वासवधैर्यलोपि।

111. कति तपः अस्ति?

(त्रिविधं, चतुर्विधं, पञ्चविधं)

Ans: त्रिविधम्।

112. 'कच्चिन्महर्षेस्त्रिविधं तपस्तत्'-कः कौत्समवदत्?

(रघुः, वरतन्तुः, आश्रमी)

Ans: रघुः।

113. मन्त्रकृताम् ऋषीणाम् अग्रणीः कः?

(वरतन्तुः, रघुः, कौत्सः)

Ans: वरतन्तुः।

114. कायेन वाचा मनसा शश्वत् संभृतं किम्?

(तपः, कर्म, प्रतिज्ञा)

Ans: तपः।

115. आधारबन्धप्रमुखैः प्रयत्नैः संवर्धिताः के?

(आश्रमपादपाः, कुशाः, मृगाः)

Ans: आश्रमपादपाः।

116. आश्रमपादपाः कीदृशाः?

(श्रमच्छिदः, पावनाः, सुखावहाः)

Ans: श्रमच्छिदः।

117. तदङ्कशय्याच्युतनाभिनाला प्रसूतिः कासाम्?

(मृगीणां, नराणां, खगानां)

Ans: मृगीणाम्।

118. मृगीणां प्रसूतिः कीदृशी?

(अनघा, निर्मला, ससुखा)

Ans: अनघा।

119. तीर्थजलानि कीदृशानि?

(शिवानि, सुखानि, मृदूनि)

Ans: शिवानि।

120. केन नियमाभिषेकः निर्वर्त्यते?

(तीर्थजलेन, मृदा, पुष्पेण)

Ans: तीर्थजलेन।

121. उञ्छषष्ठाङ्कितसैकतानि शिवानि कानि?

(तीर्थजलानि, पुष्पाणि, यवानि)

Ans: तीर्थजलानि।

122. वन्यं शरीरस्थितिसाधनं किम्?

(नीवारपाकादि, फलं, वस्त्रं)

Ans: नीवारपाकादि।

123. कडङ्करीयैः किं न आमृश्यते?

(नीवारपाकादि, वनानि, तीर्थजलानि)

Ans: नीवारपाकादि।

124. कालोपपन्नातिथिकल्प्यभागं किम्?

(वन्यं नीवारपाकादि, वन्यं जलं, वन्यं फलं)

Ans: वन्यं नीवारपाकादि।

125. सर्वोपकारक्षमम् आश्रमं किम्?

(ब्रह्मचर्यं, गार्हस्थ्यं, वानप्रस्थं)

Ans: गार्हस्थ्यम्।

126. 'मनो नियोगक्रिययोत्सुकं मे'-कस्य?

(रघोः, कौत्सस्य, वरतन्तोः)

Ans: रघोः।

127. तमित्यवोचत् वरतन्तुशिष्यः। कम्?

(कौत्सं, रघुं, वरतन्तुं)

Ans: रघुम्।

128. अर्घ्यपात्रानुमितं किम्?

(रघोः व्ययः, रघोः सत्यपालनं, रघोः ज्ञानं)

Ans: रघोः व्ययः।

129. सूर्ये तपति दृष्टेः आवरणाय का न कल्पेत?

(तमिस्रा, अन्धकारः, ज्ञानं)

Ans: तमिस्रा।

130. 'पूर्वान् महाभाग, तया अतिशेषे'-कया?

(भक्त्या, सपर्यया, ज्ञानेन)

Ans: भक्त्या।

131. एकनराधिपः सन् रघुः मखजं किं व्यनक्ति?

(अकिञ्चनत्वं, सर्वज्ञत्वं, सम्पन्नत्वं)

Ans: अकिञ्चनत्वम्।

132. कलाक्षयः श्लाघ्यतरो हि वृद्धेः। कस्य?

(सूर्यस्य, हिमांशोः, भूमेः)

Ans: हिमांशोः।

133. गुर्वर्थमाहर्तुमहं यतिष्ये। कस्मात्?

(कैलासनाथात्, अन्यतः, कुबेरात्)

Ans: अन्यतः।

134. शरद्घनं नार्दति चातकोऽपि। कीदृशं शरद्घनम्?

(निर्गलिताम्बुगर्भं, शुष्कं, सजलं)

Ans: निर्गलिताम्बुगर्भम्।

135. त्वया कियद्वेति तमन्वयुङ्क्त। कस्येदं वचनम्?

(रघुराजः, कौत्सः, वरतन्तुः)

Ans: रघुराजः।

136. विचक्षणः प्रस्तुतमाचचक्षे। विचक्षणः कः?

(रघुः, कौत्सः, वरतन्तुः)

Ans: कौत्सः।

137. यथावद्विहिताध्वरः स्मयावेशविवर्जितः कः?

(रघुः, कौत्सः, कुबेरः)

Ans: रघुः।

138. गुरुदक्षिणारूपेण गुरुः प्रथमं किं पर्यगणयत्?

(सुवर्णमुद्राः, भक्तिः, गुरुसेवा)

Ans: भक्तिः।

139. कोटीश्चतस्रो दश चाहरेति। कः कौत्समेवमुवाच?

(रघुः, वरतन्तुः, कुबेरः)

Ans: वरतन्तुः।

140. गुरुः किम् अचिन्तयित्वा चतुर्दश कोटीः सुवर्णमुद्राः दक्षिणारूपेण अनेतुं आदिदेश?

(सम्पत्समृद्धिं, अर्थकार्श्यं, दारिद्र्यं)

Ans: अर्थकार्श्यम्।

141. रघुः निष्क्रष्टुमर्थं चकमे। कस्मात्?

(कौत्सात्, कुबेरात्, वरतन्तोः)

Ans: कुबेरात्।

142. मरुत्सखस्येव बलाहकस्य गतिर्न विजघ्ने। कस्य?

(रघोः रथस्य, कौत्सस्य मार्गस्य, वरतन्तोः विद्यायाः)

Ans: रघोः रथस्य।

143. वृष्टिं शशंसुः पतितां नभस्तः। कीदृशीं वृष्टिम्?

(हिरण्मयीं, आयसीं, रजतमयीं)

Ans: हिरण्मयीम्।

144. भवन्तमीड्यं भवतः पितेव पुत्रं लभस्वेति कः आशशंस?

(कौत्सः, वरतन्तुः, कुबेरः)

Ans: कौत्सः।

145. तमग्र्यजन्मानमजं चकार। कः?

(रघुः, अजः, कुबेरः)

Ans: रघुः।

146. भोजेन दूतो रघवे विसृष्टः। किमर्थम्?

(अजस्योपनयनाय, इन्दुमतीस्वयंवरार्थं अजानयनाय, अश्वमेघयज्ञाय)

Ans: इन्दुमतीस्वयंवरार्थं अजानयनाय।

147. अवलेपमूलात् मतङ्गात् अवाप्तशापः कः?

(प्रियंवदः, कुबेरः, रघुः)

Ans: प्रियंवदः।

148. अजाय सम्मोहनं नाम अस्त्रं केन अदीयत?

(प्रियंवदेन, कुबेरेण, रघुणा)

Ans: प्रियंवदेन।

149. उपात्तविद्यो गुरुदक्षिणार्थी ------ प्रपेदे वरतन्तुशिष्यः।

(रघुः, कौत्सः, कुबेरः)

Ans: कौत्सः।

150. स मृण्मये वीतहिरण्मयत्वात् ------- निधायार्घ्यमनर्घशीलः।

(पात्रे, सुवर्णे, मृदि)

Ans: पात्रे।

151. यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैत्यन्यमिव -------।

(सूर्यात्, उष्णरश्मेः, चन्द्रात्)

Ans: उष्णरश्मेः।

152. कच्चिन्महर्षेस्त्रिविधं ------- तत्।

(कर्म, तपः, प्रतिज्ञा)

Ans: तपः।

153. आधारबन्धप्रमुखैः ------ संवर्धितानां सुतनिर्विशेषम्।

(प्रवृत्तिभिः, प्रयत्नैः, कर्मभिः)

Ans: प्रयत्नैः।

154. कच्चिन्मृगीणामनघा -------।

(प्रसूतिः, शिशुः, प्रवृत्तिः)

Ans: प्रसूतिः।

155. येभ्यो निवापाञ्जलयः -------।

(गुरूणां, सुहृदां, पितॄणां)

Ans: पितॄणाम्।

156. ------- वस्तीर्थजलानि कच्चित्।

(पूतानि, शिवानि, मधुराणि)

Ans: शिवानि।

157. कालोपपन्नातिथिकल्प्यभागं ------ शरीरस्थितिसाधनं वः।

(वन्यं, जानपदं, नागरिकं)

Ans: वन्यम्।

158. अपि प्रसन्नेन ------- त्वं सम्यग्विनीयानुमतो गृहाय।

(महर्षिणा, गुरुणा, कुबेरेण)

Ans: महर्षिणा।

159. ------ नियोगक्रिययोत्सुकं मे।

(मनः, इन्द्रियाणि, शिरः)

Ans: मनः।

160. स्वार्थोपपत्तिं प्रति ------ तमित्यवोचत् वरतन्तुशिष्यः।

(दुर्बलाशः, सफलाशः, कृतार्थः)

Ans: दुर्बलाशः।

161. सर्वत्र नो ------ अवेहि राजन्।

(वार्तं, सुखं, दुःखं)

Ans: वार्तम्।

162. नाथे कुतस्त्वयि ------ प्रजानाम्।

(शुभं, अशुभं, सुखं)

Ans: अशुभम्।

163. ----- तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा।

(चन्द्रे, सूर्ये, भूमौ)

Ans: सूर्ये।

164. ------- प्रतीक्ष्येषु कुलोचिता ते।

(प्रवृत्तिः, प्रतिज्ञा, भक्तिः)

Ans: भक्तिः।

165. त्वामर्थिभावादिति मे ------।

(विषादः, रोदनं, परिभवः)

Ans: विषादः।

166. स्तम्बेन ----- इवावशिष्टः।

(यवादि, नीवारः, तण्डुलानि)

Ans: नीवारः।

167. ------ श्लाघ्यतरो हि वृद्धेः।

(कलाः, कलाक्षयः, उपचयः)

Ans: कलाक्षयः।

168. ------ आहर्तुमहं यतिष्ये।

(विद्यार्थं, गुर्वर्थं, सुवर्णार्थं)

Ans: गुर्वर्थम्।

169. शरद्घनं नार्दति ----- अपि।

(चातकः, पिकः, कपोतः)

Ans: चातकः।

170. वर्णाश्रमाणां ---- स वर्णी विचक्षणः प्रस्तुतमाचचक्षे।

(गुरवे, प्रभवे, सूनवे)

Ans: गुरवे।

171. समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूत् -------।

(गुरुदक्षिणायै, सुवर्णाय, शुल्काय)

Ans: गुरुदक्षिणायै।

172. ------ विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति।

(धनस्य, वित्तस्य, कोशस्य)

Ans: वित्तस्य।

173. निष्क्रष्टुमर्थं चकमे -------।

(कुबेरात्, रघोः, कौत्सात्)

Ans: कुबेरात्।

174. --------- तरसा जिगीषुः।

(कुबेरं, कैलासनाथं, रघुं)

Ans: कैलासनाथम्।

175. ----- लभस्वात्मगुणानुरूपम्।

(सुतं, सूर्यं, पुत्रं)

Ans: पुत्रम्।

176. ------ अपि लेभे सुतमाशु तस्मात्।

(राजा, रघुः, कौत्सः)

Ans: राजा।

177. ----- मुहूर्ते किल तस्य देवी कुमारकल्पं कुमारं सुषुवे।

(ब्राह्मे, वाराहे, माहेश्वरे)

Ans: ब्राह्मे।

178. तमग्र्यजन्मानं ------ चकार।

(अजं, रघुं, कुमारं)

Ans: अजम्।

179. प्रवर्तितो ----- इव प्रदीपात्।

(दीपः, प्रकाशः, प्रभावः)

Ans: दीपः।

180. ---- दूतो रघवे विसृष्टः।

(रघुणा, भोजेन, कौत्सेन)

Ans: भोजेन।

181. सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय ------ तदीयम्।

(मदं, सुखं, जलं)

Ans: मदम्।

182. अथ प्रभावोपनतैः ------- कल्पद्रुमोत्थैरवकीर्य पुष्पैः।

(कुमारं, युवानं, वृद्धं)

Ans: कुमारम्।

183. उवाच ----- दशनप्रभाभिः संवर्धितोरस्थलतारहारः।

(वाग्मी, पटुः, कौत्सः)

Ans: वाग्मी।

184. अवेहि गन्धर्वपतेस्तनूजं ------ मां प्रियदर्शनस्य।

(रघुं, कुबेरं, प्रियंवदं)

Ans: प्रियंवदम्।

185. ------ नाम सखे ममास्त्रम्।

(उन्मोहनं, सम्मोहनं, दुःखापहं)

Ans: सम्मोहनम्।

186. ------- सोऽस्त्रविदस्त्रमन्त्रं जग्राह तस्मान्निगृहीतशापात्।

(प्रत्यङ्मुखः, पराङ्मुखः, उदङ्मुखः)

Ans: उदङ्मुखः।

187. ----- चिरेण नयनाभिमुखी बभूव।

(निद्रा, तन्द्रा, सुखं)

Ans: निद्रा।

188. ----- गता मतिमतां वर मुञ्च शय्याम्।

(दिवसं, रात्रिः, प्रकाशः)

Ans: रात्रिः।

189. किं वा रिपूंस्तव ----- स्वयमुच्छिनत्ति।

(गुरुः, सोदरः, प्रभुः)

Ans: गुरुः।

190. ------ विहाय वनजाक्ष वनायुदेश्याः।

(निद्रां, तन्द्रां, प्रतिज्ञां)

Ans: निद्राम्।

191. राजर्षिरवर्तत - सन्धिच्छेदं कुरुत।

(राजर्षिः अवर्तत, राजर्षि अवर्तत, राजर्षिर वर्तत)

Ans: राजर्षिः अवर्तत।

192. तथेति - सन्धिच्छेदं कुरुत।

(तथ इति, तथा इति, तथे ति)

Ans: तथा इति।

193. गर्भानधारयन्-सन्धिच्छेदं कुरुत।

(गर्भा नधारयन्, गर्भान् धारयन्, गर्भान् अधारयन्)

Ans: गर्भान् अधारयन्।

194. कापि- सन्धिच्छेदं कुरुत।

(का पि, का अपि, क आपि)

Ans: का अपि।

195. तवेदम् - सन्धिच्छेदं कुरुत।

(तव इदं, तव एदं, तवे दं)

Ans: तव इदम्।

196. देवानामपि - सन्धिच्छेदं कुरुत।

(देवानाम् अपि, देवान आमपि, देवान् अपि)

Ans: देवानाम् अपि।

197. तावदेव - सन्धिच्छेदं कुरुत।

(तावत् एव, तावद एव, ताव देव)

Ans: तावत् एव।

198. कुर्यात्तर्हि- सन्धिच्छेदं कुरुत।

(कुर्या त्तर्हि, कुर्यात् अर्हि, कुर्यात् तर्हि)

Ans: कुर्यात् तर्हि।

199. पुनरपि- सन्धिच्छेदं कुरुत।

(पुन रपि, पुनः अपि, पुन अपि)

Ans: पुनः अपि।

200. तयोश्च- सन्धिच्छेदं कुरुत।

(तयो श्च, तयोः च, तयो च)

Ans: तयोः च।

201. तमध्वरे - सन्धिच्छेदं कुरुत।

(त मध्वरे, तम् अध्वरे, तम ध्वरे)

Ans: तम् अध्वरे।

202. इत्युवाच- सन्धिच्छेदं कुरुत।

(इत्यु वाच, इति उवाच, इत्युव् आच)

Ans: इति उवाच।

203. इवोष्णरश्मेः- सन्धिच्छेदं कुरुत।

(इव उष्णरश्मेः, इवो ष्णरश्मेः, इवोष्ण रश्मेः)

Ans: इव उष्णरश्मेः।

204. तपस्तत्- सन्धिच्छेदं कुरुत।

(तप तत्, तपः तत्, तप स्तत्)

Ans: तपः तत्।

205. कच्चिन्न- सन्धिच्छेदं कुरुत।

(कच्चित् न, कच्चि न्न, कच् चिन्न)

Ans: कच्चित् न।

206. वस्तीर्थजलानि - सन्धिच्छेदं कुरुत।

(वस्ती र्थजलानि, वः तीर्थजलानि, वः स्तीर्थजलानि)

Ans: वः तीर्थजलानि।

207. ह्ययं- सन्धिच्छेदं कुरुत।

(हि अयं, ह्य यं, ह् अयं)

Ans: हि अयम्।

208. वनान्माम् - सन्धिच्छेदं कुरुत।

(वना न्मां, वनात् मां, वनान् मां)

Ans: वनात् माम्।

209. सुरैर्हिमांशोः - सन्धिच्छेदं कुरुत।

(सुरैः हिमांशोः, सुरैर्हि मांशोः, सुरैर्हिम अंशोः)

Ans: सुरैः हिमांशोः।

210. यावद्यते - सन्धिच्छेदं कुरुत।

(याव द्यते, या आवद्यते, यावत् यते)

Ans: यावत् यते।

211. वृक्षेण इत्यत्र विभक्तिं निर्दिशत।

(पञ्चमी, तृतीया, षष्ठी)

Ans: तृतीया।

212. वृक्षे इत्यत्र विभक्तिं निर्दिशत।

(सप्तमी, पञ्चमी, द्वितीया)

Ans: सप्तमी।

213. लताः इत्यत्र विभक्तिं निर्दिशत।

(द्वितीया, सप्तमी, पञ्चमी)

Ans: द्वितीया

214. लतायै इत्यत्र विभक्तिं निर्दिशत।

(द्वितीया, चतुर्थी, पञ्चमी)

Ans: चतुर्थी।

215. लतायाः इत्यत्र विभक्तिं निर्दिशत।

(पञ्चमी, द्वितीया, सप्तमी)

Ans: पञ्चमी।

216. वनशब्दस्य द्वितीया द्विवचने रूपं किम्?

(वने, वनयोः, वनाभ्यां)

Ans: वने।

217. वनानाम् इत्यत्र विभक्तिं निर्दिशत।

(षष्ठी, द्वितीया, पञ्चमी)

Ans: षष्ठी।

218. पितृशब्दस्य द्वितीया बहुवचने रूपं किम्?

(पितॄः, पितॄन्, पितुः)

Ans: पितॄन्।

219. पितरि इत्यत्र विभक्तिं निर्दिशत।

(सप्तमी, द्वितीया, चतुर्थी)

Ans: सप्तमी।

220. कविना इत्यत्र विभक्तिं निर्दिशत।

(तृतीया, पञ्चमी, षष्ठी)

Ans: तृतीया।

221. कविशब्दस्य सप्तमी द्विवचने रूपं किम्?

(कव्योः, कविभ्यां, कवी)

Ans: कव्योः।

222. वृक्षशब्दस्य पञ्चमी बहुवचने रूपं किम्?

(वृक्षेभ्यः, वृक्षात्, वृक्षाभ्यां)

Ans: वृक्षेभ्यः।

223. लताशब्दस्य द्वितीया द्विवचने रूपं किम्?

(लते, लताभ्यां, लतयोः)

Ans: लते।

224. वनशब्दस्य सप्तमी एकवचनं किम्?

(वने, वनयोः, वनेषु)

Ans: वने।

225. पितृशब्दस्य षष्ठी एकवचने रूपं किम्?

(पितरि, पितुः, पित्रा)

Ans: पितुः।

226. भवतः इत्यत्र लकारः कः?

(लट्, लिट्, लोट्)

Ans: लट्।

227. अभवन् इत्यत्र लकारः कः?

(लङ्, लट्, लृट्)

Ans: लङ्।

228. भविष्यन्ति इत्यत्र लकारः कः?

(लट्, लृट्, लिट्)

Ans: लृट्।

229. बभूव इत्यत्र लकारः कः?

(लिट्, लट्, लङ्)

Ans: लिट्।

230. भवानि इत्यत्र लकारः कः?

(लोट्, लिट्, लृट्)

Ans: लोट्।

231. भूधातोः लटि मध्यमपुरुषैकवचने रूपं किम्?

(भवसि, भवति, भवामि)

Ans: भवसि।

232. भूधातोः लृटि प्रथमपुरुषद्विवचने रूपं किम्?

(भविष्यतः, भविष्यथः, भविष्यावः)

Ans: भविष्यतः।

233. भूधातोः लङि मध्यमपुरुषद्विवचने रूपं किम्?

(अभवतं, अभवतां, अभवाव)

Ans: अभवतम्।

234. भूधातोः लिटि उत्तमपुरुषैकवचने रूपं किम्?

(बभूव, बभूविव, बभूविम)

Ans: बभूव।

235. भूधातोः लोटि प्रथमपुरुषबहुवचने रूपं किम्?

(भवतु, भवतां, भवन्तु)

Ans: भवन्तु।

236. दैत्य अरिः दैत्यारिः- अत्र सन्धिनिर्देशं कुरुत।

(दीर्घसन्धिः, गुणसन्धिः, यण्सन्धिः)

Ans: दीर्घसन्धिः।

237. कृष्ण एकत्वम् इत्यत्र सन्धिनिर्देशं कुरुत।

(वृद्धिसन्धिः, गुणसन्धिः, दीर्घसन्धिः)

Ans: वृद्धिसन्धिः।

238. वृक्षौ अपि इत्यत्र सन्धिनिर्देशं कुरुत।

(अयादिसन्धिः, यण्सन्धिः, गुणसन्धिः)

Ans: अयादिसन्धिः।

239. रामः शेते रामश्शेते इत्यत्र सन्धिनिर्देशं कुरुत।

(यण्सन्धिः, व्यञ्जनसन्धिः, अयादिसन्धिः)

Ans: व्यञ्जनसन्धिः।

240. वने भवम्।

(वन्यं, वनभवं, वनेभवम्)

Ans: वन्यम्।

241. दशसु दिक्षु रथं यापयति इत्यस्य एकपदं किम्?

(दशरथः, दाशरथिः, दशरथिः)

Ans: दशरथः।

242. राजपुत्रः इत्यत्र विग्रहः कः?

(राज्ञः पुत्रः, राजस्य पुत्रः, राज्ञस्य पुत्रः)

Ans: राज्ञः पुत्रः।

243. द्वौ अवयवौ अस्य इत्यस्य एकपदं किम्?

(द्वयम्, द्वितीयम्, द्वि)

Ans: द्वयम्।

©

Reserved